योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ३१

एकत्रिंशः सर्गः ३१

श्रीवसिष्ठ उवाच ।

अतः प्रबोधाय तव वच्मि राम महामते ।

दामव्यालकटन्यायो मा तेऽस्त्विति तु लीलया ।। १

अविवेकानुसंधानाच्चित्तमापदमीदृशीम् ।

अनन्तभवदुःखाय परिगृह्णाति हेलया ।। २

क्व किलामरविध्वंसिशम्बरानीकनाथता ।

क्व तापतप्तजम्बालजालजर्जरमीनता ।। ३

क्व धैर्यममरानीकविद्रावणकरं महत् ।

क्व किरातमहीपालक्षुद्रकिङ्करररूपता ।। ४

क्व नाम निरहङ्कारचित्सत्त्वोदारधीरता ।

क्व मिथ्यावासनावेशादहङ्कारकुकल्पना ।। ५

शाखाप्रतानगहना संसारविषमञ्जरी ।

अहङ्काराङ्कुरा देव समुदेतीयमातता ।। ६

अहङ्कारमतो राम मार्जयान्तः प्रयत्नतः ।

अहं न किंचिदेवेति भावयित्वा सुखी भव ।। ७

अहङ्काराम्बुदच्छन्नं परमार्थेन्दुमण्डलम् ।

रसायनमयं शीतमदृश्यत्वमुपागतम् ।। ८

अहङ्कारपिशाचार्ता दामव्यालकटास्त्रयः ।

गताः सत्तामसन्तोऽपि मायामाहात्म्यदानवाः ।। ९

काश्मीरेषु महारण्यसरसीवनपल्वले ।

अद्य मत्स्याः स्थिता राम शैवाललवलालसाः ।। १०

श्रीराम उवाच ।

नासतो विद्यते भावो नाभावो विद्यते सतः ।

ते ह्यसन्तः कथं सत्तां संपन्ना इति मे वद ।। ११

श्रीवसिष्ठ उवाच ।

एवमेतन्महाबाहो नासत्संभवति क्वचित् ।

कदाचित्किंचिदप्येव बृहत्संपद्यते तनु ।। १२

किमसत्संस्थितं ब्रूहि किं तत्सद्वाथ संस्थितम् ।

सम्यङ्निदर्शनेनैव करिष्ये तव बोधनम् ।। १३

श्रीराम उवाच ।

सन्त एव स्थिताः सन्तो ब्रह्मन्वयमिमे किल ।

दामादयस्त्वसन्तोऽपि वक्षि सन्तः स्थिता इति।।१४

श्रीवसिष्ठ उवाच ।

यथा दामादयो राम स्थिता मायामया इति ।

असत्या एव सत्याभा मृगतृष्णाम्बुपूरवत् ।। १५

तथैवेमे वयमपि ससुरासुरदानवाः ।

असत्या एव वल्गामो याम आयाम एव च ।। १६

अलीकमेव त्वद्भावो मद्भावोऽलीकमेव च ।

अनुभूतोऽप्यसद्रूपः स्वप्ने स्वमरणं यथा ।। १७

मृतो बन्धुर्यथा स्वप्नेऽप्यनुभूतोऽप्यसन्मयः ।

मृतोऽयमिति चेज्ज्ञप्तिर्भवेदेवमिदं जगत् ।। १८

एषातिमूढविषय उक्तिरेव न राजते ।

अभ्यासेन विनोदेति नानुभूतेरपह्नवः ।। १९

निश्चयोऽन्तःप्ररूढो यः संपन्नोऽभ्यसनं विना ।

नाशमायाति लोकेऽस्मिन्न कदाचन कस्यचित् ।।२०

इदं जगदसद्ब्रह्म सत्यमित्येव वक्ति यः ।

तमुन्मत्तमिवोन्मत्तो विमूढोऽपि हसत्यलम् ।। २१

अक्षीबक्षीवयोरैक्यं क्व किलेहाज्ञतज्ज्ञयोः ।

अन्धप्रकाशयोर्बोधे स्याच्छायातपयोरिव ।। २२

यत्नेनाप्यनुभूतोऽर्थः सत्ये कर्तुमपह्नवम् ।

अज्ञोऽन्तश्च न शक्नोति शवमाक्रमणं यथा ।। २३

ब्रह्म सर्वं जगदिति वक्तुं नाज्ञस्य युज्यते ।

तपोविद्याननुभवे स तदेवानुभूतवान् ।। २४

अबुद्धविषये ह्येषा राम वाक्प्रविराजते ।

बुद्धस्यास्मीति रूपेण किल नास्त्येव किंचन ।। २५

ब्रह्मेवेदं परं शान्तमित्येवानुभवन्सुधीः ।

अपह्नवः स्वानुभूतेः कर्तुं तस्य क्व युज्यते। ।। २६

परस्माद्व्यतिरेकेण नाहमात्मनि किंचन ।

हेमनीवोर्मिकादित्वं न मय्यस्ति विशिष्टता ।। २७

भूतता व्यतिरेकेण मूढे नात्मनि किंचन ।

ऊर्म्यादिबुद्धौ हेमेव ज्ञे नास्ति परमार्थता ।। २८

मिथ्याहंतामयो मूढः सत्यैकात्ममयः सुधीः ।

युज्यते न क्वचिन्नाम स्वभावापह्नवोऽनयोः ।। २९

यो यन्मयस्तस्य तस्मिन्युज्यतेऽपह्नवः कथम् ।

पुरुषस्य घटोऽस्मीति वाक्यमुन्मत्तमेव हि ।। ३०

तस्मान्नेमे वयं सत्या नच दामादयः क्वचित् ।

असत्यास्ते वयं चेमे नास्ति नः खलु संभवः ।। ३१

सत्यं संवेदनं शुद्धं बोधाकाशं निरञ्जनम् ।

सत्यं सर्वगतं शान्तमस्त्यनस्तमयोदयम् ।। ३२

सर्वं शान्तं च निःशून्यं न किंचिदिव संस्थितम् ।

तत्र व्योम्नि विभान्तीमा निजा भासोऽङ्ग सृष्टयः।।३३

यथा तैमिरिकाक्षस्य सहजा एव दृष्टयः ।

केशोण्ड्रकादिवद्भान्ति तथेमास्तत्र दृष्टयः ।। ३४

स आत्मानं यथा वेत्ति तथानुभवति क्षणात् ।

चिदाकाशस्ततोऽसत्यमपि सत्यं तदीक्षणात् ।। ३५

न सत्यमस्ति नासत्यमिति तस्माज्जगत्त्रये ।

यद्यथा वेत्ति चिद्रूपं तत्तथोदेत्यसंशयम् ।। ३६

यथा दामादयस्तद्वदेवमभ्युदिता वयम् ।

सत्यासत्याः किमत्राङ्ग तान्प्रत्यपि विकल्पना ।। ३७

अस्यानन्तस्य चिद्व्योम्नः सर्वगस्य निराकृतेः ।

चिदुदेति यथा यान्तस्तथा सा तत्र भात्यलम् ।। ३८

यत्र दामादिरूपेण संवित्प्रकचिता स्वयम् ।

तथा सा तत्र संपन्ना तथाकारानुभूतितः ।। ३९

अस्मदादिस्वरूपेण संविद्यत्रोदिता स्वयम् ।

तथासौ तत्र संपन्ना तथाकारानुभूतितः ।। ४०

स्वस्वप्नप्रतिभासस्य जगदित्यभिधा कृता ।

चिद्व्योम्नो व्योमवपुषस्तापस्येव मृगाम्बुता ।। ४१

यत्र प्रबुद्धं चिद्व्योम तत्र दृश्याभिधा कृता ।

यत्र सुप्तं तु तेनैव तत्र मोक्षाभिधा कृता ।। ४२

नच तत्क्वचिदासुप्तं न प्रबुद्धं कदाचन ।

चिद्व्योम केवलं दृश्यं जगदित्यवगम्यताम् ।। ४३

निर्वाणमेव सर्गश्रीः सर्गश्रीरेव निर्वृतिः ।

नानयोः शब्दयोरर्थभेदः पर्याययोरिव ।। ४४

परमार्थो जगदिति रूपं वेत्ति स्वयं स्वकम् ।

यथा तैमिरिकं चक्षुः केशोण्ड्रकमिवेक्षते ।। ४५

न तत्केशोण्ड्रकं किंचित्सा हि दृष्टिस्तथा स्थिता ।

नेदं दृश्यमिदं किंचिदित्थं चिद्व्योम संस्थितम् ।। ४६

सर्वत्र सर्वमिदमस्ति यथानुभूतं

नो किंचन क्वचिदिहास्ति न चानुभूतम् ।

शान्तं सदेकमिदमाततमित्थमास्ते

संत्यक्तशोकभयमेदमतस्त्वमास्स्व ।। ४७

शिलोदराकारघनं प्रशान्तं

महाचिते रूपमिदं स्वमच्छम् ।

नैवास्ति नास्तीति दृशौ क्वचित्तु

यच्चास्ति तत्साधु तदेव भाति ।। ४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु स्थितिप्रकरणे सदसन्निराकरणं नामैकत्रिंशः सर्गः ।।

३१ ।।